# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**M.A./M.Sc. THIRD SEMESTER EXAMINATION, DECEMBER 2015**

**SECOND YEAR [BATCH 2014-16]**

**SANSKRIT**

Date : 16/12/2015

Time : 11 am – 3 pm

**Paper :** VII [KĀVYA]

Full Marks : 100

1. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदेयम्। [10]

क) काव्यात्मत्वेन ध्वनेः माहात्म्यं केनाभ्युपगतम्? तस्य मतानुसारेण ध्वनेः स्वरूपं विव्रियताम्।

ख) को नाम रसः? संस्कृतकाव्यमीमांसाशास्त्रे के तावदालंकारिकाः रसवादिनः के वा तद्विरुद्धवादिनः? रसवादिनाम् आलंकारिकाणां मूलतत्त्वं विशदीक्रियताम्।

2. अधोलिखितेषु **दशानां** प्रश्नानामुत्तरं विधेयम्। [10×1]

क) वामनकृतं रीतेः सामान्यलक्षणं किम्?

ख) रसगङ्गाधरस्य कोऽर्थः?

ग) 'वक्रोक्ति'— शब्दस्य कोऽर्थः?

घ) भोजमते शृङ्गारशब्दस्य कोऽर्थः?

ङ) 'चित्रमीमांसा' इति ग्रन्थस्य विशिष्टः समालोचकः कः?

च) अलंकारशब्दस्य का व्युत्पत्तिः?

छ) के तावत् रससूत्रस्य मुख्याः व्याख्यातारः?

ज) भामहप्रणीतं काव्यलक्षणं लिख्यताम्?

झ) वैदर्भमार्गस्य प्राणत्वेन केषामुल्लेखो दण्डिना कृतः?

ञ) प्रतिभायाः का संज्ञा?

ट) कस्यचि**देक**स्य संज्ञा विधेया : शब्दालंकारः, अर्थालंकारः, अनुप्रासः, अतिशयोक्तिः

ठ) रूपगोस्वामिकृतस्य कस्यचिदलंकारग्रन्थस्य नाम उल्लिख्यताम्।

ड) व्यक्तिविवेकस्य रचयिता कः?

3. **एकः** प्रश्नः समाधेयः। [10]

क) को नामाभिव्यक्तिवादः? को वा अस्य प्रवक्ता? अभिव्यक्तिवादविषये प्रबन्धमेकं विरचय।

ख) ''अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्।।'' —व्याख्यायताम्।

4. निम्नोक्तपङ्क्ति**द्वय**स्य व्याख्या कार्या। [2×5]

क) मुखे रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन।

ख) रसादीनामनन्तत्वाद्भेद एको हि गण्यते।

5. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदीयताम्। [10]

क) शब्दसमुदाये साहित्याभावाः कुन्तकदिशा सोदाहरणमालोचनीयाः। अत्र कुन्तकस्य विशेषत्वं कुत्र?

ख) कुन्तकेन स्वभावोक्तिनाम्नः अलंकारस्य खण्डनं कथं विहितम्?

6. **द्वयो**रेव व्याख्या कार्या। [2×5]

क) रूपकादिरलंकारस्तथान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनिताननम्।।

ख) शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।

7. कस्यचि**<u>देकस्य</u>** व्याख्या कार्या। [5]

क) रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता।

ख) तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा।

8. अधोलिखितानां **<u>पञ्चा</u>**नामेव संक्षिप्तं टिप्पनकं लेख्यम्। [5×3]

क) प्रतिभा

ख) काव्यम्

ग) अप्ययदीक्षित:

घ) मध्यमकाव्यम्

ङ) काव्यप्रकाश:।

9. कश्चि**<u>देक:</u>** समाधीयताम्। [10]

क) राजशेखरस्य मतानुसारेण काव्योत्पत्ते: किं कारणम्?

ख) पाकशब्दस्य कोऽर्थ: ? काव्यपाकस्य भेदा: समुल्लेखनीया:।

10. अधोलिखितानां प्रश्नानां **<u>पञ्चानामेव</u>** उत्तरं प्रदीयताम्। [5×2]

क) काव्यमीमांसां वर्जयित्वा राजशखरेण प्रणीतानां मध्ये द्वयमुल्लिख्यताम्।

ख) यायावरीयशब्देन कस्य समुल्लेख: ? का तस्य भार्या?

ग) राजशेखरस्य मते के तावत् पदविभागा: ?

घ) ''तद्धितमूढा: पाणिनीया:'' —व्याख्यायताम्।

ङ) ''नासत्यं नाम किञ्चन काव्ये'' — व्याख्यायताम्।

—————— × ——————